Title लघुसिद्धान्त कौमुदी

Author वरदराजः

Extent ३८ पत्र Age

Subject व्याकरण

लघुसिद्धान्त कौमुदी
व.द.द.नं.

सिद्धांत
लघुकौमुदी १

Complete
स्टेशन

Fo. 38

२०६

उरपत्रानि

२६ पोत्रा

नं. २८१६

[illegible]

ल॰ कौ॰ १

ॐ नमः शिवाय ॥ ॐ नत्वा सरस्वतीं देवीं शुद्धां गुण्यां करोम्यहं पाणिनीयप्रवेशाय लघुसिद्धान्तकौमु-
दीं ॥ अइउण् ऋलृक् एओङ् ऐऔच् हयवरट् लण् ञमङणनम् झभञ् घढधष् जबगडदश् खफ-
छठथचटतव् कपय् शषसर् हल् इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि ॥ एषामन्त्या इ-
तः । हकारादिष्वकार उच्चारणार्थः लणमध्ये त्वित्संज्ञकः । हलन्त्यम् । उपदेशेऽन्त्यं हलित्स्यात् उपदेश
आद्योच्चारणं सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र । अदर्शनं लोपः । प्रसक्तस्यादर्शनं लोपसंज्ञं स्या-
त् तस्य लोपः तस्येतो लोपः स्यात् णादयोऽणाद्यर्थाः आदिरन्त्येन सहेता । अन्त्येनेता सहित आदिर्म-
ध्यगानां स्वस्य च संज्ञा स्यात् यथाणिति अ इ उ वर्णानां संज्ञा एवमच् हल् अल् इत्यादयः । ऊकालो-
ऽज्झ्रस्वदीर्घप्लुतः । उश्च ऊश्च ऊ३श्च वः वां काल इव कालो यस्य सोऽच् क्रमाद्ध्रस्वदीर्घप्लुतसंज्ञः स्यात् स
प्रत्येकमुदात्तादिभेदेन त्रिधा । उच्चैरुदात्तः । ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञः
स्यात् आये । नीचैरनुदात्तः । ताल्वादिषु सभागेषु स्थानेष्वधोभागे निष्पन्नोऽजनुदात्तसंज्ञः स्यात् । समा-
हारः स्वरितः । उदात्तानुदात्तत्ववर्णधर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञः स नवविधोऽपि प्रत्येकमनु-
नासिकाननुनासिकत्वाभ्यां द्विधा । मुखनासिकावचनोऽनुनासिकः । मुखसहितनासिकयोच्चार्य-
माणो वर्णोऽनुनासिकसंज्ञः स्यात् तदित्थम् अइउऋ एषां वर्णानां प्रत्येकमष्टादश भेदाः लृवर्णस्य द्वादश
तस्य दीर्घाभावात् एचामपि द्वादश तेषां ह्रस्वाभावात् । तुल्यास्यप्रयत्नं सवर्णम् । ताल्वादिस्थानमाभ्यन्तरप्र-
यत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णं स्यात् ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम् अकुहविस-
र्जनीयानां कण्ठः इचुयशानां तालु ऋटुरषाणां मूर्धा लृतुलसानां दन्ताः उपूपध्मानीयानामोष्ठौ ञमङ-

१

णानां नासिका च एदैतोः कंठतालु ओदौतोः कंठोष्ठं वकारस्य दंतोष्ठं जिह्वामूलीयस्य जिह्वामूलं नासि-
कानुस्वारस्य प्रयत्नो द्विधा आभ्यंतरो बाह्यश्च आद्यः पंचधा स्पृष्टेषत्स्पृष्टेषद्विवृतविवृतसंवृतभेदात् तत्र स्पृ-
ष्टं प्रयत्नं स्पर्शानां ईषत्स्पृष्टमंतःस्थानाम् ईषद्विवृतमूष्मणां विवृतं स्वराणां ह्रस्वस्यावर्णस्य प्रयोगे संवृ-
तं प्रक्रियादशायां तु विवृतमेव बाह्यस्त्वेकादशधा विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण
उदात्तोनुदात्तः स्वरितश्चेति खरो विवाराः श्वासा अघोषाश्च वर्गाणां प्रथमतृतीयपंचमा हशः संवारा नादा
घोषाश्च यणश्चाल्पप्राणाः अन्ये महाप्राणाः कादयो मावसानाः स्पर्शाः यणोन्तःस्थाः शल ऊष्माणः अचः
स्वराः ≍क ≍ख इति कखाभ्यां प्रागर्द्धविसर्गसदृशो जिह्वामूलीयः ≍प ≍फ इति पफाभ्यां प्रागर्द्धविसर्गसदृश उप-
ध्मानीयः अं अः इत्यचः परावनुस्वारविसर्गौ । अनुदित्सवर्णस्य चाप्रत्ययः । अविधीयमानोऽणुदिच्च सव-
र्णस्य संज्ञा स्यात् अत्रैवाण्परेण णकारेण कु चु टु तु पु एते उदितः तदेवम् अ इत्यष्टादशानां संज्ञा तथेकारोका-
रौ ऋकारस्त्रिंशतः एवं लकारोपि एचो द्वादशानां अननुनासिकाननुनासिकाभेदेन यवला द्विधा तेनाननुना-
सिकास्ते द्वयोर्द्वयोः संज्ञा । परः सन्निकर्षः संहिता । वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात् ।
हलोनंतराः संयोगः । अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः । सुप्तिङंतं पदं । सुबंतं तिङंतं च पदसंज्ञं
स्यात् इति संज्ञाप्रकरणं ॥ इको यणचि । इकः स्थाने यण् स्यादचि संहितायां सुधी उपास्य इति स्थिते । तस्मि-
न्निति निर्दिष्टे पूर्वस्य । सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यं । स्थानेंतरतम ः ।
प्रसंगे सति सदृशतम आदेशः स्यात् सुध् य् उपास्य इति स्थिते । अनचि च । अचः परस्य यरो द्वे वा स्तो न त्वचि ।
संयोगांतस्य लोपः । संयोगांतं यत्पदं तदंतस्य लोपः स्यात् अलोन्त्यस्य षष्ठीनिर्दिष्टस्यान्त्यस्यादेशः स्यात् इ

ल कौ० २ निषामे यणः प्रतिषेधो वाच्यः। कालोञ्जभ्रकृषि सुद्ध्युपास्यः मद्ध्वरिः धात्त्रंशः लाकृतिः। एचोयवायावः।
एचः क्रमादय् अव् आय् आव् एते स्युरचि। यथासंख्यमनुदेशः समानाम्। समसंबन्धी विधिर्यथासंख्यं स्यात्। हर
ये विष्णवे नायकः पावकः। वान्तो यि प्रत्यये। यादौ प्रत्यये परे ओदौतोरवावौ स्तः गव्यं नाव्यं। हाभ्यनध्वाशाक
र्थे। धातोदेशनिपातनार्थमिदं वाक्यं नयं पावकार्थे किं सयंपाय जेयमनः अध्वपरिमाणे च गव्यूतिः अदे
ङ्गुणः अदेङ्गुणसंज्ञः स्यात् तपरस्तत्कालस्य तपरस्तान्तो वा उच्चार्यमाणः समकालस्यैव संज्ञा स्यात् एकः
पूर्वपरयोरित्यधिकृत्य आद्गुणः अवर्णादचि पूर्वपरयोरेको गुणादेशः स्यात् संहितायां उपेन्द्रः रमेशः गंगो
दकं। उपदेशेजनुनासिक इत् उपदेशेऽनुनासिकाः पाणिनीयाः प्रतिज्ञानुनासिकोऽजित्संज्ञः स्यात् लण्सू
त्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा। उरण्परः। ऋ इति त्रिंशतः संज्ञेत्युक्तं तत्स्थाने योऽणस्स परस
न्नेव प्रवर्तते कृष्णर्द्धिः तवल्कारः। लोपः शाकल्यस्य। अवर्णपूर्वयोः पदान्तयोर्यवयोर्लोपो वाशि परे। ए
वं स्थानिवद्। सपादसप्ताध्याय्यां प्रति त्रिपाद्यसिद्धा त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात् हर एह हरयि
ह विष्ण इह विष्णाविह। वृद्धिरादैच् आदैच्च वृद्धिसंज्ञः स्यात् वृद्धिरेचि आदेचि वृद्धिरेकादेशः स्यात् गुणा
पवादः कृष्णैकत्वं गंगौघः देवैश्वर्यं कृष्णौत्कण्ठ्यं। एत्येधत्यूठ्सु। अवर्णादेजाद्योरेत्येधत्योरूठि च परे वृ
द्धिरेकादेशः स्यात् उपैति उपैधते प्रष्ठौहः एजाद्योः किं उपेतः मा भवान् प्रेदिधत्। स्वादीरेरिणोः। स्वैर
स्वैरिणी अक्षाद्ऊहिन्यां अक्षौहिणी सेना। प्रादूहोढोढ्येषैष्येषु। प्रौहः प्रौढः प्रौढिः प्रैषः प्रैष्यः ऋते च तृ
तीयासमासे अवर्णादृते परे तृतीयासमासे वृद्धिरेकादेशः स्यात् सुखेन ऋतः सुखार्तः तृतीयेति किं पर
मर्तः प्रवत्सतरकम्बलवसनार्णदशानामृणे प्रार्णं वत्सार्णं वत्सतरार्णं ऋणार्णं दशार्णं। २

उपसर्गाः क्रियायोगे । गतिश्च प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः गतिसंज्ञाश्च प्र परा अप सम् अनु अ-
व निर् निस् दुर् दुस् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप एते प्रादयः भूवादयो धातवः क्रि-
यावाचिनो भ्वादयो धातुसंज्ञाः स्युः उपसर्गादृति धातौ अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेशः स्यात्
प्रार्छति उपार्छति एङि पररूपं आङुपसर्गादेङादौ धातौ परे पररूपमेकादेशः स्यात् प्रेजते उपोषति । अ-
चोऽन्त्यादि टि । अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात् शकन्ध्वादिषु पररूपं वाच्यं तच्च टेः शकन्धुः कर्कन्धुः
मनीषा पतञ्जलिः सीमन्तः केशवेशे सीमान्तोऽन्यः सारङ्गः पशुपक्षिणोः साराङ्गोऽन्यः आकृतिगणोऽयमा
तोऽः । ओत्वोष्ठयोः समासे वा । पररूपं वा स्यात् स्थूलोतुः स्थूलौतुः बिम्बोष्ठः बिम्बौष्ठः समासे किं तवौष्ठः । ओ-
माङोश्च अवर्णादोमि आङि च परे पररूपमेकादेशः स्यात् शिवायोन्नमः शिवेहि अकः सवर्णे दीर्घः ।
अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यात् दैत्यारिः श्रीशः विष्णूदयः होतॄकारः । एङः पदान्तादति ।
पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात् हरेऽव विष्णोऽव सर्वत्र विभाषा गोः । लोके वेदे चैङन्तस्य गोरति
वा प्रकृतिभावः पदान्ते गोअग्रे गोऽग्रे एङन्तस्य किं चित्रग्वग्रम् पदान्ते किं गोः ङसिङसोश्च एङन्तात् ङसिङसोरति
परे पूर्वमेकादेशः स्यात् । अनेकाल्शित्सर्वस्य अनेकालादेशः शित्सर्वस्य स्यादिति प्राप्ते ङिच्च ङिदने-
काल् अन्त्यस्यैव स्यात् । अवङ् स्फोटायनस्य । पदान्ते एङन्तस्य गोरवङ् वाऽचि परे गोअग्रं गवाग्रं पदान्ते किं गवि
इन्द्रे च गोरवङ् इन्द्रे च गवेन्द्रः वाङ्वाहः दूराद्धूते च दूरात्संबोधने वाक्यस्यान्तस्यैव स्यात् । अवङ् स्फोटायनस्य ।
पदान्ते एङन्तस्य गोरवङ् वाऽचि परे गोऽग्रं गवाग्रं पदान्ते किं गवि इन्द्रे च गोरवङ् इन्द्रे च गवेन्द्रः वाङ्वाहः दूराद्-
धूते च दूरात्संबोधने वाक्यस्य टेः प्लुतः स्यात् प्लुतप्रगृह्या अचि नित्यम् एते अचि प्रकृत्या स्युः आगच्छ कृष्ण३ अत्र गौश्च

ल०
कौ०
३
3

ति । ईदूदेद्द्विवचनंप्रगृह्यं ईदूदेदंतंद्विवचनंप्रगृह्यंस्यात् हरीएतौ विष्णूइमौगंगेअमू अदसोमात् । अस्मात्परौ
ईदूतौप्रगृह्यौस्तः अमीईशाः रामकृष्णावमूआसाते मात्किं अमुतिसाशृह्णप्रकारौप्रवर्तेते अमुकेत्र चाद
योऽसत्वे लिंगसंख्यानितेद्रव्ये अद्रव्यार्थाश्चादयोनिपातसंज्ञाःस्युः प्रादयः एतेपितथा । निपातएकाजनाङ्
एकोऽज्निपातआङ्वर्जः प्रगृह्यः इइंद्रः उउमेशः वाक्यस्मरणयोरङित् आएवंनुमन्यसे आएवंनुकिलतत् ।
ङित्तुन प्रगृह्यः ईषदुष्णे ओष्णम् ओत् ओदंतोनिपातःप्रगृह्यः अहोईशाः संबुद्धौशाकल्यस्येतावनार्षे संबु
द्धिनिमित्तकओकारोवा प्रगृह्योऽवैदिकेइतौपरे विष्णोइति विष्णइति विष्णविति मयउञोवोवामयःपरस्यउञोवोवास्या
दचि किमुउक्तं किम्वुक्तं इकोऽसवर्णेशाकल्यस्यह्रस्वश्च । पदान्ताइकोऽसवर्णेऽचिपरे ह्रस्वावास्युः ह्रस्वविधि
सामर्थ्यान्नस्वरसंधिः चक्रिअत्र चक्र्यत्र पदान्ताःकिं गौर्यौ नसमासे वाप्यश्वः ऋत्यकः । ऋतिपरे पदा
न्ताअकःप्रकृत्या ब्रह्मऋषिः ब्रह्मर्षिः पदान्ताःकिं आर्च्छत् । इत्यच्संधिः स्तोःश्चुनाश्चुः । स्तोःसकारतवर्ग
योः शकारचवर्गाभ्यांयोगेशकारचवर्गौस्तः रामश्शेते रामश्चिनोति सच्चित् शार्ङ्गिञ्जय शात् । शात्
परस्यतवर्गस्य चुत्वंनस्यात् विश्नः प्रश्नः ष्टुनाष्टुः स्तोःष्टुनायोगेष्टुःस्यात् रामष्षष्ठः रामष्टीकते तट्टी
का चक्रिण्ढौकसे नपदान्ताट्टोरनाम् । पदान्ताट्टवर्गात्परस्यानामःस्तोःष्टुर्नस्यात् षट्सन्तः षट्ते पदान्तात्किं ईट्टे टोःकिं सर्पिष्ट
मं अनाम्नवतिनगरीणामितिवाच्यं षण्णां षण्णवतिः षण्णगर्यः तोःषिः २ तवर्गस्यषकारेपरेष्टुत्वं
नसन्षष्ठः झलांजशोन्ते पदान्तेझलांजशःस्युः वागीशः चिद्रूपं । यरोनुनासिकेनुनासिकोवा । यर
पदान्तस्यानुनासिकेपरेनुनासिकोवास्यात् एतन्मुरारिः प्रत्ययेभाषायांनित्यम् तन्मात्रं चिन्मयं तो
र्लिः तवर्गस्यलकारेपरेपरसवर्णः तल्लयः किंचाल्लिखति नस्यानुनासिकोलकारः उदःस्थास्तंभोः ३

सवेसवर्णेः स्यात् तस्मादित्युत्तरस्य पंचमेनिर्देशेनक्रियमाणंकार्यंवर्णान्तरेणाव्यवहितस्यपरस्यज्ञेयं । आदेःपर
स्य । परस्यपदविहितेनतस्मादेर्बोध्यं इतिसमस्यार्थः अत्राघोषस्यमहाप्राणस्यसस्थानोहकाराणवत्थकारः । कोरा
कृतिसवर्णे । हलःपरस्यलोपोवास्यात् सवर्णेकृते त्विषि यतियोकलोचरःस्युः इत्युदाहरणनः उत्थाने
उत्थाने उत्तंभने उत्कंभनम् । कयोर्होन्यतरस्यात् । कयः परस्यहस्यपूर्वसवर्णोवास्यात् संवारस्यनादे
स्यघोषस्यमहाप्राणस्यहकारस्यतादृशएवचतुर्थः वाग्घरिः वाग्हरिः तद्धविः तद्हविः । शश्छोटि । पदान्ता
त्क्रयः परस्यशस्यछोवास्यादटि तच्छिवः तच्शिवः पदान्तात्किं विश्नः छत्वममीतिवाच्यं तच्छ्लोकेन त
च्श्लोकेन अम्परे किं वाक्श्च्योतति । मोनुस्वारः मान्तस्यपदस्यानुस्वारः स्याद्धलि हरिंवंदे पदस्येतिकिं
गम्यते । नस्यापदान्तस्यझलि । नस्यमस्यचापदान्तस्यझल्यनुस्वारः यशांसि आक्रंस्यते झलिकिं म
न्यते । तस्यापदान्तस्यक अंकितः अंचितः कुंठितः शांतः गुंफितः वापदान्तस्यानुस्वारस्ययपिपरस
वर्णोवास्यात् त्वंकरोषि त्वङ्करोषि संयन्ता संयन्ता संवत्सरः संवत्सरः यल्लोकं यंलोकं अत्रानुना
सिकपरेसानुनासिकायवलाः । मोराजिसमःक्कौ । क्विबंतेराजतौपरेसमोमस्यमएवस्यात् सम्राट् । हे
मपरेवा । मपरेहकारेपरेमस्यमोवास्यात् किंह्मलयति किंह्मलयति यवलपरेयवलावेतिवक्तव्यं
किंह्यः किंह्यः किंह्वलयति किंह्वलयति किंल्ह्लादयति किंह्लादयति । नपरेनः । नपरेहकारेपरे
मस्यनःस्याद्वा किंह्नुते किंह्नुते । ङ्णोःकुक्टुक्शरि । ङिणितोपदान्तस्यक्रमात्कुक्टुकावयवौवाहलः प्राङ्क्
षष्ठः । वास्तः प्राङ्क्षष्ठः प्राङ्षष्ठः सुगण्ट्षष्ठः सुगण्षष्ठः । डःसिधुट् । डात्परस्यसस्यधुड्वास्यात् षट्
सन्तः षट्सन्तः । नश्च । नांतात्परस्यसस्यधुड्वास्यात् सन्त्सः सन्सः शीन्तुक् । नस्यपदान्तस्यशेपरेतुग्वा

स्यात् प्राङ्क्षोटीति क्त्वविकल्पः पदेकरोकरीतिविलोपः सञ्छंभुः सञ्च्छंभुः सञ्चशंभुः सञ्शंभुः । ङमो
ह्रस्वादचि ङमुण्नित्यं । ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्परस्याचो ङमुडागमः स्यात् नित्यं प्रत्यङ्ङात्मा सु
गण्णीशः सन्नच्युतः । समः सुटि । समो मस्य रुः स्यात् सुटि अत्रानुनासिकः पूर्वस्य तु वा अत्र रुप्रकरणे रोः
पूर्वस्यानुनासिको वा स्यात् अननुनासिकात्परोऽनुस्वारः । अननुनासिकं विहाय रोः पूर्वस्मात्परोऽनुस्वाराग
मः स्यात् । खरवसानयोर्विसर्जनीयः । खरि अवसाने च पदान्तस्य रेफस्य विसर्गः संपुंकानां सो वक्त॰
व्यः सँस्कर्ता संस्कर्ता । पुमः खय्यम्परे । अम्परे खयि पुमो रुः स्यात् पुँस्कोकिलः पुंस्कोकिलः । नश्छ
व्यप्रशान् । अम्परे छवि नकारान्तस्य पदस्य रुः स्यात् न तु प्रशानः नस्य विसर्जनीयस्य सः विसर्जनीयस्य सः स्या॰
त् खरि शार्ङ्गिश्छिन्धि शार्ङ्गिँश्छिन्धि चक्रिंस्त्रायस्व चक्रिँस्त्रायस्व अप्रशान् किं प्रशान् तनोति पदस्येति किं ह
न्ति । नॄन्पे । नॄनस्य रुर्वा स्यात् पकारे कुप्वोः कपौ च कवर्गे पवर्गे च विसर्जनीयस्य क्रमाज्जिह्वामूलीयोपध्मानीयौ स्तः वा
विसर्गः नॄँपाहि नॄंःपाहि नॄँपाहि नॄँःपाहि नॄन्पाहि । कानाम्रेडिते । कान्नकारस्य रुः स्यादाम्रेडिते परे
नस्य परमाम्रेडितं द्विरुक्तस्य परं रूपमाम्रेडितं स्यात् काँस्कान् कांस्कान् छे च ह्रस्वस्य छे तुक् स्यात् शिवच्छाया आ॰
ङ्माङोश्च । तुक् स्यात् छे आच्छादयति माच्छिदत् दीर्घात् तुक् छे म्लेच्छति म्लेच्छति । पदान्ताद्वा । दीर्घात्प
दान्ताच्छे तुग्वा लक्ष्मीच्छाया लक्ष्मीछाया । इति हल्सन्धिः । विसर्जनीयस्य सः खरि विसर्जनीयस्य सो वि
सर्जनीयः । शर्परे खरि विसर्गस्य विसर्गः नन्वयात् कः त्सरः घनाघनः क्षोभणः वा शरि । शरि विसर्गस्य वि
सर्गो वा हरिः शेते हरिश्शेते । इति विसर्गसंधिः । सोऽजसा सोऽस्तीति सप्रत्यये कृते शिवम् अर्च्यं हरिर्वि
ते । ससजुषो रुः । पदान्तस्य सस्य सजुषश्च रुः स्यात् । अतो रोरप्लुतादप्लुते अप्लुतादतः परस्यरो ५

रुः स्यादसमेति निर्वोच्यः । रुरिव यनुलादतः पयस्योरुहः स्याद्वाशी निर्वोवेध्यः । भोभगोअघोअपूर्वस्य योऽशि ।
एतत्पूर्वस्य रोर्यादेशोऽशि परे देवा इह देवायिह भो अत्र भोयत्र अघोयत्र इति संज्ञानिपातः नेषां हलयेव यलोपः ।
व्योर्लघुप्रयत्नतरः शाकटायनस्य । पदान्तयोर्वयोर्लघूच्चारणौ वयौ वा स्तोऽशि यस्योच्चारणे जिह्वाग्रोपाग्र
मध्यमूलानां शैथिल्यं स लघूच्चारणः । गेङ्गोर्गेणास्य । गेकारान्तस्य पदान्तस्याल्लघुप्रयत्नस्य यस्य लोपः भो
अच्युत लघुप्रयत्नपक्षे भोयच्युत पदान्तस्य किं नायम् । हलि सर्वेषाम् । भोभगोअघोअपूर्वस्य यस्य लोपः स्या
द्धलि भो देवाः भगो नमस्ते अघो याहि देवा नमस्याः । रोरि । अकारे रफादेशो मनस्वपि अरहरः अरहगोल :
रोरि । रेफस्य रेफे लोपः स्यात् ढ्रलोपे पूर्वस्य दीर्घोऽणः । ढरेफयोर्लोपनिमित्तयोः परतः पूर्वस्या
णो दीर्घः पुना रमते अग्णः किरहढः अढः मनम रपः इत्यत्र रहत्वे कृते हृणि वे सुवेशरीति वलोपे प्राप्ते ।
विप्रतिषेधे परं कार्यं । तुल्यबलविरोधे परं कार्यं स्यात् इति लोपे प्राप्ते पूर्वत्रासिद्धमिति रोरेत्यात्यासिद्ध
त्वाद्गुणमेव मनोरथः एतत्तदोः सुलोपोऽनञ्समासे हलि अककारयोरेतत्तदोः सुलस्य लोपो हलि न
ञ्समासेन एष विष्णुः सशंभुः अकः किं एषको रुद्रः अनञ्समासे किं असशिवः असः शिवः हलि किं एषो
ऽत्र सोऽपि लोपे वेत्यादिपूरणे सः स्यस्येतो लोपः स्यादचि पादपूरणे सैष दाशरथी राम सोमाम विधिभूः
ति सैष दाशरथी रामः ॥ ॥ इति विसर्गसंधिः ॥ ॐ अर्थवदधातुरप्रत्ययः प्रातिपदिकं ॥
धातुप्रत्ययवर्जमर्थवच्छब्दरूपं प्रातिपदिकसंज्ञं स्यात् कृत्तद्धितसमासाश्च कृत्तद्धिता
न्तौ समासाश्च प्रातिपदिकाः स्युः सौ जस् अम् औ शस् टा भ्याम् भिस् ङे भ्याम् भ्यस् ङसि भ्याम् भ्यस् ङस् ओस् आम् ङि ओस् सुप् समानाज्जस् इ
ति षष्ठी प्रथमा अम् औट् शस् द्वितीया टा भ्यां भिस् इति तृतीया ङे भ्यां भ्यस् इति चतुर्थी ङसि भ्यां भ्यस्

स॰
का॰
५

5

म इति पंचमी ङस्ङसोसाम् इति षष्ठी ङिओस्सुप् इति सप्तमी स्याद्यानि तिपदिकात् शब्दादावेवायाति
पदिकात्स्युपरे स्याद्यः प्रत्ययाः स्युः सुपः सुपस्त्रीणित्रीणिवचनान्येकाकशः एकवचनद्विवचनबहुवचनसं
ज्ञानिस्युः सुपः सुपस्त्रीणित्रीणिवचनान्येकाकशः सामेवमाने वर्णेनामभावो वसानो वा स्यात् हत्वाविसर्गो
रामः सरूपाणामेकशेष एकविभक्तौ एकविभक्तौ यानि सरूपाणि बहूनि तेषामेकापवशिष्यते प्रथम
योः पूर्वसवर्णः अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः इति प्राप्ते नादिचि आदिचि न पूर्वसव
र्णदीर्घ एकादेशः वृद्धिरेचि रामौ बहुषु बहुवचने जस् प्रत्ययादौ चुटू हलन्त्यम् विभक्तिश्च सुप्तिङौ विभ
क्तिस्थैतोसलः नाविभक्तौ तुस्माः विभक्तिस्थास्तवर्गसकारमकारा इत्संज्ञा न स्युरिति निषेधेनेत्वम् रामः एकवचनं सं
बोधिः संबोधने प्रथमा एकवचनं संबुद्धिः यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गं यः प्रत्ययो यस्मात्क्रियते
तदादिशब्दस्वरूपं तस्मिन्नङ्गं स्यात् एङ्ह्रस्वात्संबुद्धेः परो नाङ्गस्वानाद्वाणोलवप्यते संबुद्धेश्चेत् हे राम हे रा
मौ हे रामाः अमि पूर्वः अकोऽम्यचि परतः पूर्वरूपमेकादेशः रामं रामौ लिङ्गकृत्तद्धिते नदिलवर्जेऽत्र
याया लक्षणकारणोद्वितः स्युः तस्माच्छसो नः पुंसि पूर्वसवर्णदीर्घात्परयोः शस् तस्य सस्य नः स्यात्पुंसि रष
भ्यां नो णः समानपदे ऋकाराद्व्यवायेऽपि अकवर्गपवर्गआमैतव्यवसेयंयात्संभवेमिलितैः व्यवधाने
पि रषाभ्यां परस्य नस्य णः स्यादिति प्राप्ते न पदान्तस्य नस्य णो न स्यात् रामान् टाङसिङसामिनात्स्याः अदन्ताद्दा
टो इनामिनात्स्याः स्युः णत्वं रामेण सुपि च यञादौ सुप्यतो रामस्य दीर्घः रामाभ्यां अतो भिस ऐस् अकारान्ता
देशागड्डिमस्यैः स्यात् अनेकालिशित्सर्वस्य रामैः ऐसि अनेकाल्त्वस्यैष सर्वादेशः स्थानिवदादेशोऽनलि
धौ आदेशः स्थानिवत् न तु स्थान्यलाश्रयविधौ वर्णमात्राश्रितो विधिरलविधिरिति स्थानिवत्वान्नापि वानिदो ५

र्वे: रामाय रामाभ्यां बहुवचने झल्येत् झलादौ बहुवचने झल्यतोऽस्यैकारः रामेभ्यः वावसाने अवसाने झ-
लां चत्वं वास्यः रामात् रामाद् रामाभ्यां रामेभ्यः रामस्य ओसि च अतोऽस्यैकारः रामयोः ह्रस्वनद्यापो नुट् ह्र-
स्वान्तान्नद्यन्तादाबन्तात्परस्यामो नुडागमः स्यात् नामि अजन्तांगस्य दीर्घः स्यान्नामि रामाणां रामे रामयोः षत्वे
कृते आदेशप्रत्यययोः इणकवर्गाभ्यां परस्यापदान्तस्यादेशस्य प्रत्ययावयवस्य सस्य मूर्धन्यादेशः स्या-
त् ईषद्विवृतस्य सस्य तादृश एव षः रामेषु एवं कृष्णमुकुन्दादयः सर्वादीनि सर्वनामानि सर्व विश्व उभ उभय इतर
म अन्य अन्यतर इतर त्वत् त्व नेम सम सिम पूर्व पराऽवर दक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् स्वमज्ञा-
ति धनाख्यायां अन्तरं बहिर्योगोपसंव्यानयोः त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवत्
किम् जसः शी अदन्तात्सर्वनाम्नो जसः शी अनेकाल्शित्सर्वस्य सर्वे सर्वनाम्नः स्मै अतः सर्वनाम्नो
ङेः स्मै सर्वस्मै ङसिङ्योः स्मात्स्मिनौ अतः सर्वनाम्नः एतयोरेतौ स्तः सर्वस्मात् आमि सर्वनाम्नः सुट् अवर्णा-
त्सर्वनाम्नो विश्वादयोऽप्यदंताः उभशब्दो नित्यं द्विवचनान्तः उभौ २ उभाभ्यां ३ उभयोः २ तस्येह पाठोऽनकर्त-
व्यः इतर इत नेमोऽन्यपर्यायो प्रत्ययग्रहणे तदंतग्रहणमिति तदंतग्रहः नेमस्यार्द्धे समः सर्वपर्यायः तुल्यप-
र्यायस्तु नेह यथासंख्यत्वं समानामिति ज्ञापकात् पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञाया
समेत्तायां एषां व्यवस्थायामसंज्ञायां सर्वनामसंज्ञा गणपाठात्सर्वत्र या प्राप्ता सा तन्निवा पूर्वे वा पूर्वाः
स्वाभिधेयापेक्षावधिनियमो व्यवस्था व्यवस्थायां किं दक्षिणा गाथकाः कुशला इत्यर्थः असंज्ञायां किं उत्त-
राः कुरवः स्वमज्ञातिधनाख्यायाम् ज्ञातिधनान्यवाचिनः स्वशब्दस्य प्राप्तसंज्ञा तत्सिवा स्वे स्वाः आत्मीयाः
आत्मनो वेत्यर्थः ज्ञातिधनवाचिनस्तु स्वाः ज्ञातयो धना वा अन्तरं बहिर्योगोपसंव्यानयोः बाह्ये परिधा-

ल॰ कौ॰ ९

नीयेवार्थेनरणाह्वानस्यचासंज्ञोनस्यिवा अंतरे अंतराः वाह्याः वाह्यस्यचार्थः अंतरेअंतराः वाशाटकाः परिधानी
यरेत्यर्थः पूर्वादिभ्योनवभ्योवा एभ्योङसिङ्योःस्मात्स्मिनौस्तोवा पूर्वस्मात् पूर्वात् पूर्वस्मिन् पूर्वे एवंपरादी
नाम् शेषंसर्ववत् तीयस्यङित्सुवा द्वितीयस्मै द्वितीयायेत्यादि एवंतृतीयः निर्जरः जरायाजरसन्य
तरस्याम् जरायाजरसादेशोऽजादौविभक्तौ पदाङ्गाधिकारेतस्यतदन्तस्यचग्रहणं निर्दिश्यमानस्या
देशाभवन्ति निर्जरसौ निर्जरसः इत्यादि पक्षेहलादौचरामवत् विश्वपाः सुडनपुंसकस्य स्वादिपंचवच
नानि सर्वनामस्थानसंज्ञानिस्युरक्लीबस्य स्वादिष्वसर्वनामस्थानेषुपरेषुपूर्वंपदसंज्ञंस्यात् यचिभं यकारा
दिष्वजादिष्वक्लीबस्य स्वादिष्वसर्वनामस्थानेषुपरेषुपूर्वंभसंज्ञंस्यात् आकडारादेकासंज्ञा इतऊर्ध्वंकडार
कर्मधारयइत्यतः प्रागेकस्यैकैवसंज्ञाज्ञेयायापरानवकाशाच आतोधातोः आकारान्तोयोधातुस्तदन्त
स्यभस्याङ्गस्यलोपः अलोऽन्त्यस्य विश्वपः विश्वपाभ्यामित्यादि एवंशङ्खध्मादयः धातोः किम् हाहान् ह
रिः हरीजसिच ह्रस्वान्तस्याङ्गस्यगुणः हरयः ह्रस्वस्यगुणः सम्बुद्धौहेहरे हरिं हरी हरीन् शेषोघ्यसखि
शेषइतिस्पष्टार्थम् ह्रस्वौयाविदुतौतदन्तंसखिवर्जंघिसंज्ञंस्यात् आङोनाऽस्त्रियाम् घेःपरस्याङोनास्या
दस्त्रियाम् आङितिटासंज्ञाप्राचाम् हरिणा हरिभ्याम् हरिभिः घेर्ङिति घिसंज्ञकस्यङितिसुपिगुणःस्यात् हरये ह
रिभ्यां गुणेकृते ङसिङसोश्च एङःङसिङसोरतिपूर्वरूपमेकादेशः हरेः हर्योः हरीणाम् अच्चघेः इदुद्भ्या
मुत्तरस्यङेरौत् घेरन्तादेशश्च हरौ हरिषु एवंकव्यादयः अनङ्सौ सख्युरङ्गस्यानङादेशोऽसम्बुद्धौ अलोऽन्त्यात्
वेऽपधायाः सर्वनामस्थानेचासंबुद्धौ नान्तस्योपधायादीर्घोऽसम्बुद्धौ सर्वनामस्थाने अपृक्तएकाल्प्र
त्ययः हल्ङ्याब्भ्योदीर्घात्सुतिस्यपृक्तंहल् हलन्तात्परंदीर्घौयौङ्यापौ तदन्ताच्चापरंसुतिसीत्येतदपृक्तंह ९

ह्रस्वेते प्रत्ययलोपे प्रत्ययलक्षणं प्रत्ययलक्षणेन तदाश्रितं कार्यं स्यात् सखा सखायौ संबुद्धौ सखे सख्युरसंगात्यः
२ संबुद्धिवर्जे सर्वनामस्थाने णिद्वत् ग्रहणेनाणिति ग्रहणं तस्याणस्य दृद्धिः णिति णिति सखायौ सखायः हे
सखे सखायं सखीन् सख्या सखे। ख्यत्यात्परस्य ङिति निषाटाभ्यां खीती शब्दाभ्यां कृतयणादेशाभ्यां पर
स्य ङितिनिपाहाभ्यां खीती शब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसि ङसोरुः ततः सख्युः औत् इतः परस्य
ङेः औत् सख्यौ शेषं हरिवत् पतिः समासे एव घिसंज्ञः पत्या पत्ये पत्युः २ पत्यौ शेषं हरिवत् समासे तु भूप
तये कतिबहुवचनान्तः किंशब्दात् डतिप्रत्ययः बहुगणवतुडति संख्या इति व डत्यन्तस्य संख्यावद्भावः संज्ञा स्यात्
षट्भ्यो लुक् जश्शसोः प्रत्ययस्य लुक् श्लु लुपः लुक् श्लु लुप् शब्दैः कृते प्रत्ययादर्शने क्रमात् ते तत्संज्ञाः स्यात्
त् जसि च निगुणे प्राप्ते लुङ्गमतां गस्य लुमता शब्देन लुप्ते न तन्निमित्तं कार्यं स्यात् कति २ कतिभिः कतिभ्यः
कतीनां कतिषु प्रत्ययलक्षणं न तु संज्ञाद्विपुमन्यूपः त्रिशब्दो नित्यं बहुवचनान्तः त्रयः त्रीन् त्रिभिः त्रिभ्यः २
त्रेस्त्रयः आमि त्रयाणां त्रिषु गौणत्वे त्वपि प्रियत्रयाणां त्यदादीनामः पञ्चमः स्यादि भक्तौ द्विपर्यन्ताना
मेवेष्टिः द्वौ द्वाभ्यां द्वयोः २ पातिलोकान् इति पपीः सूर्यः पपीः पप्यौ पप्यः पपीम् पप्यौ पपीन् पप्या
पपीभ्यां पपीभिः पप्ये पपीभ्यां पपीभ्यः पप्यः पपीभ्यां पपीभ्यः पप्यः पप्योः पप्यां पप्योः पपी पप्योः पप्याः पं
पीषु बहुः श्रीयस्यो यस्या स बहुश्रेयसी। एवं अतिलक्ष्मी। ईदूतौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः प्रथम
लिङ्गग्रहणं च सर्वे स्यात् स्यापसर्जनत्वेपि नदीत्वं वक्तव्यमिति ग्रेवार्थ्येनयादृशः संबुद्धौ हे बहुश्रेयसि
अम्बार्थनद्योर्ह्रस्वः नद्याः परे यादिङिताम् आट् आगमः स्यात् आगमस्य आद्यौ विपरे वृद्धिरेकादेशः स्यात् बहुश्रेयस्यै बहु
श्रेयस्याः २ बहुश्रेयसीनां शेषं पपीवत् अतिलक्ष्मीः शेषं बहुश्रेयसीवत् प्रधीः प्रविष्क्रयात् भुवो

य्वोरियङुवङौ श्नुप्रत्ययान्तस्य धातोरिवर्णोवर्णान्तस्य भ्रूइत्यस्य च इयङुवङौ स्तः अजादौ प्रत्यये परे इति प्राप्ते एरनेका
चोऽसंयोगपूर्वस्य धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् अ-
जादौ प्रत्यये परे प्रध्यौ प्रध्यं प्रध्यः प्रध्यि शेषं पपीवत् एवं ग्रामणीः ङौ तु ग्रामण्यां गतिकारकेतरपू-
र्वपदस्य यण्नेष्यते शुद्धधियौ न भूसुधियोः एतयोरचि सुपि यण्न स्यात् सुधीः सुधियौ सुधियः इत्यादि
सुखमिच्छतीति सुखीः सुख्युः २ सुतमिच्छतीति सुतीः सुत्युः २ शेषं प्रधीवत् शम्भुर्हरिवत् एवं भा-
न्वादयः तृज्वत्क्रोष्टुः असंबुद्धौ सर्वनामस्थाने क्रोष्टुरित्यस्य क्रोष्टृप्रयोक्तव्यः ऋतो ङि सर्वनामस्थानयोः ऋ-
तोऽङ्गस्य गुणः ङौ सर्वनामस्थाने चेति प्राप्ते ऋदुशनस्पुरुदंसोऽनेहसां च ऋदन्तानामुशनसादीनां चानङ् स्या-
त् असंबुद्धौ सौ परे अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् एषामुपधाया दीर्घः असं-
बुद्धौ सर्वनामस्थाने ऋतस्य गुणः हे क्रोष्टो क्रोष्टा क्रोष्टारौ क्रोष्टारः क्रोष्टारं क्रोष्टारौ क्रोष्टून् विभाषा
तृतीयादिष्वचि अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत् क्रोष्ट्रा क्रोष्ट्रे ऋत उत् ऋदन्तात् ङसिङसोर-
ति परे उकार एकादेशः स्यात् रपरत्वं रात्सस्य रेफात्संयोगान्तस्य सस्यैव लोपो नान्यस्य क्रोष्टुः २ क्रोष्ट्रोः २
क्रोष्ट्रोः क्रोष्टुः नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन क्रोष्टूनाम् क्रोष्टरि क्रोष्टौ क्रोष्टुषु पक्षे ह-
लादौ शम्भुवत् हूहूः हूह्वौ हूह्वः इत्यादि अतिचमूशब्दे तु नदीकार्यं विशेषः अतिचमूः हे अतिचमु अति-
चम्वै अतिचम्वाः अतिचमूनाम् अतिचम्वाम् खलपूः ओः सुपि धात्ववयवसंयोगपूर्वो न भवति य उ-
वर्णः तदन्तो यो धातुः तदन्तस्यानेकाचोऽङ्गस्य यण् स्यात् अचि सुपि खलप्वौ खलप्वः एवं सुल्वादयः स्व-
भूः स्वभुवौ स्वभुवः वर्षाभ्वश्च अस्य यण् स्यात् अचि सुपि वर्षाभ्वावित्यादि दृन्भूः दृन्करपुन : १

एवं स्वयंभूर्यो यवनृहव्यः हव्यौ एवं करभूः पुनर्भूः धातृ इत्यादि धाता धातारौ धातारः आवर्णात्तस्य णत्वं वाच्यं धातृ
णां एवं नप्त्रादयः नप्त्रादिग्रहणं व्युत्पत्तिपक्षे नियमार्थं तेनेह न पिता पितरौ पितरः पितरं पितरौ शेषं धा
तृवत् एवं जामात्रादयः नृ ना नरौ नरः नृ च नुग्णामित्यादौ दीर्घः स्यात् नृणां नृणां गोतो णित् गोकारा
न्नादिहिते सर्वनामस्थाने णिद्वत्स्यात् गौः गावौ गावः ओतोम्शसोः ओदन्तादम्शसोराकार एकादेशः का
देशः स्यात् गां गावौ गाः गवा गवे गोः गोरित्यादि रायो हलि रै इत्यस्याकारादेशो हलि विभक्तौ राः रा
यौ रायः रायं रायौ रायः राया राभ्यामित्यादि ग्लौः ग्लावौ ग्लावः ग्लौभ्यामित्यादि इत्यजन्ताः पुल्लिंगाः
रमा औङ आपः आबन्तादङ्गादौङः शीः स्यात् औङिति औकारविभक्तिः संज्ञा रमे रमाः संबुद्धौ च आप एकारः
संबोधने हे रमे हे रमे हे रमाः आङि चापः आङि ओसि चाप एकारः स्यात् रमया रमाभ्यां रमाभिः या
डापः आपः परस्य ङितो याडागमः स्यात् ङ्यादिः रमायै रमाभ्यां रमाभ्यः रमायाः रमयोः रमाणां रमायां रमासु एवं दु
र्गाम्बिकादयः सर्वनाम्नः स्याड्ढ्रस्वश्च आबन्तात्सर्वनाम्नो ङितः स्यात् आपश्च ह्रस्वः सर्वस्यै सर्वस्याः २
सर्वनाम्नः स्याट् शेषं रमावत् एवं विश्वादयः आबन्ताः विभाषा दिक्समासे बहुव्रीहौ सर्वनामता वा या उत्तर
दिशा पूर्वा यस्याः सा उत्तरपूर्वा यस्याः तस्यै उत्तरपूर्वस्यै उत्तरपूर्वायै एवमन्यत्र तीयस्य ङित्सु वा सर्वनामसंज्ञा द्वि
तीयस्यै द्वितीयायै एवं तृतीया अम्बार्थानां ह्रस्वः हे अम्ब हे अक्क हे अल्ल अम्बार्थानां ह्रस्वो हलकारान्तानां
ह्रस्वो न हे अम्बाडे हे अम्बाले हे अम्बिके नरा जरसो न रे इत्यादि शेषं रमावत् मातापितृवत् मातृङिति ह्रस्व
स्य इयङ्वङ्स्थानौ स्त्रीशब्दो हि इयङुवङ्स्थानौ स्त्र्याख्यौ नदी इति संज्ञा स्यात् वा आमि स्त्री वा नदी संज्ञा ङिति
मत्यै मतये मत्याः मतेः २ आण्नद्याः ह्रस्वो नद्याः ईकारोकाराभ्यां परस्य ङित आडागमः स्यात्

ल॰ कौ॰ ८ न मत्यां मत्यो शेषं हरिवत् एवं बुद्ध्यादयः त्रिचतुरोः स्त्रियां तिसृचतसृ स्त्रीलिंगयोरेतयोरेतौ स्तोऽचि भक्तो प्रवि
रूस्मनः तिसृचतसृ ओतौ गोदेषो विविभक्तौ गुणदीर्घोत्वानामपवादः तिस्रः २ तिसृभिः तिसृभ्यः २ आट
मिन्नट् न तिसृचतसृ एतयोर्नामि दीर्घः हेशांति एवंतस्वादयः लसृष्वेहेरनेमतिष्ठाप्नु दे २ दाभ्यां ३ दायोः २
गौरी गौर्यौ गौर्यः लक्ष्मीः शेषं गौरीवत् एवं नद्यादयः स्त्री हे स्त्रि स्त्रियः स्त्रीशब्दस्य इयङ् अजादौ
प्रत्यये स्त्रियो वाम्शसोः स्त्रियं वाऽम्यङ् अमिशसिच स्त्रियांश्चस्त्रियः स्त्रीः स्त्रियाः स्त्रियै स्त्रियाः २ परत्वा
न्नुट् स्त्रीणां स्त्रीषु श्रीः श्रियौ श्रियः नेयङुवङ्स्थानावस्त्री । इयङुवङोः स्थितिर्ययोस्तावीयूतौ नदीसंज्ञौ
न स्त्री नवस्त्री हे श्रीः श्रिया श्रियै श्रिये श्रियाः श्रियः २ श्रियोवाऽमि इयङुवङ्स्थानौ स्त्र्याख्यौ यू आ
मिवा नदीसंज्ञौ नवस्त्री श्रियां श्रीणां श्रियि श्रियां धेनुर्मतिवत् स्त्रियाञ्च स्त्रीवाच्यो क्रोष्टुस्तृज्वद्रूपं लभ
ते क्रोष्ट्र्यादिशेप अरेत्तेऽयोऽनोऽनस्त्रि स्त्रियां शेष क्रोष्ट्री वधूः गौरीवत् भूः श्रीवत् स्वयंभूः पुंवत् नषट्
स्वस्त्रादिभ्यः एभ्यो ङीप् टाबीत नस्तः स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा याता मातेति सप्तैते स्वस्त्रा
दय उदाहृताः स्वसा स्वसारौ मातापितृवत् द्यौर्मातृवत् द्यौः गोवत् राः पुंवत् नौः ग्लौवत् इत्यजन्ताः स्त्री
लिंगाः अथाम अतोऽमात् क्लीबात् स्वमोर् लोपे पड्ङ्स्वादिति लोपः हे ज्ञान नपुंसकाच्च क्लीबादौङः
शी भसंज्ञायां यस्येति च एकारेति विलनभस्य वर्णावर्णयोर्लोपः इत्यतो लोके प्राप्ते औङः श्यां प्रतिषेधो
वाच्यः ज्ञाने जश्शसोः शि क्लीबाज्जसशसोः शिः स्यात् शि सर्वनामस्थाने नपुंसकस्य झलचः नुम्स्यात् वा
च्यत्वोमित्स्यात् उपधादीर्घः ज्ञानानि पुनस्तद्वत् शेषं पुंवत् एवं धनवनफलादयः अद्ड्डतरादिभ्यः पं
चभ्यः एभ्यः क्लीबेभ्यः स्वमोरद्डादेशः स्यात् टेः डिति भस्य टेर्लोपः कतरत् कतरद् कतरे कतराणि हे ८

8

कतरत् डेकतरत् ष्येषेवेषुत् कतमत् इतरत् अन्यत् अन्यतरत् अन्यतमशब्दस्यान्यतमेत्येव एकतरात्प्रतिषेध
एकतरं ह्रस्वोनपुंसके प्रातिपदिकस्य अजन्तस्येत्येव श्रीपं त्तानवत् समानपुंसकात् लुक् स्यात् वारि इकोचि
विभक्तौ इकोनपुंसकस्येति नुम् अचि विभक्तौ वारिणी वारीणि नलमतेत्यस्यानित्यत्वाद्धेसंबुद्धिनिमित्तो गुणः हे
वारे हे वारि ङेङसिङसोङीनां गुणाभावपक्षे नुम्बाधकत्वात् गुणाभावे पूर्वविप्रतिषेधेन वारिणे वारिणः २ वारिणो २
नुमचिरेति नुट् वारीणां वारिणि हलादौ हरिवत् तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य प्रवृत्तिनिमित्ते
वैभाषितपुंस्कमित्युक्ते क्लीबे पुंवद्भावो नादावपि अनाद्यैकत्वानादिनेत्यादि यन्निमित्तमुपादाय पुंसि शब्दः प्रवर्
तते क्लीबवृत्ति तस्मिन्नेव स्याद् न तु कर्पूरं नेति च्यते पीलने फलाय प्रवृत्ति एवं न प्रवृत्तिनिमित्तभेदात् अस्थिदधिस
क्थ्यक्ष्णामनङ् उदात्तः टादावचि अल्लोपोनः अंगावयवो सर्वनामस्थानयकारादौ स्वादिष्वादेशो योऽन् तस्या
कारस्यलोपः दध्ना दध्ने दध्नः दध्नोः दध्नाम् विभाषाङिश्योः अंगावयवो योऽन् तस्याकारस्यलोपो वा ङिश्योः
दध्नि दधनि शेषं वारिवत् एवम् अस्थ्यादि मधु मधुनी मधूनि हे मधु हे मधो एवं जत्वादयोः स्खलु स्खलनो
स्खलूनि स्खला स्खलुनेत्यादि धातृ धातृणी धातॄणि हे धातः हे धातृ धातृणा धात्रा धातृणा एवं ज्ञात्रा
दयः एवं स्वस्रादेशो अतिरिष्यमाने पुंसीति एवं मध्येपचरकृ एवं स्यात् प्रिय प्रियनी प्रियूणि प्रियुनेत्यादि श्रि
श्रिणी श्रीणि श्रिणा एकदेशविकृतमनन्यवत् इत्यजन्तानपुंसकलिंगाः हेऽः ह्रस्वस्याढः स्यात् क
लिपदान्तेचलिट् लिट् लिहौ लिहः लिहां लिहस् लिड्भ्यां दादेर्धातोर्घः । कलिपदान्तेषुपदेशे दादे
र्धातोः ह्रस्वचः स्यात् एकाचो बशो भष् झलन्तस्यान्त्योः धातवयवस्य एकाचो बशः भष् स्यात् । से
ध्वपदान्तेच । धुक् धुग् दुहौ दुहः धुग्भ्यां धुक्षु वा द्रुहमुहस्निह्ष्णिहां वा घः कलिपदान्तेच मु

ल॰ कौ॰ ५

क् धुग् दुहौ दुहः धुग्भ्यां धुक्षु वा द्रुहमुहष्णुहष्णिहाम् एषां हस्य वा घः झलि पदान्ते च ध्रुक् ध्रुग् ध्रुट् ध्रुड् द्रु
हौ द्रुहः ध्रुग्भ्यां ध्रुड्भ्यां ध्रुक्षु ध्रुट्सु एवं मुहः धात्वादेः षः सः स्नुक् स्नुग् स्नुट् स्नुड् स्नुहौ एवं ष्णिहः इग्यणः
संप्रसारणम् यणः स्थाने प्रयुज्यमानो य इक् संप्रसारणसंज्ञः स्यात्। वाह ऊठ् भस्य वाहः संप्रसारणम् ऊठ् संप्र
सारणाच्च संप्रसारणाद् अचि पूर्वरूपम् एकादेशः वृद्धिः विश्वौहः इत्यादि चतुरनडुहोरामुदात्तः अनयोराम् स्या
त् सर्वनामस्थाने परे सावनडुहः सान्तवस्वन्तस्य स्रंसादेश्च दः स्यात्पदान्ते अनडुद्भ्याम् इत्यादि पदान्ते किं स्रस्तं ध्व
स्तं सहेः साडः सः साड्रूपस्य सहेः सस्य मूर्धन्यादेशः तुराषाट् तुराषाड् तुराषाहौ तुराषाड्भ्याम् इत्यादि दिव औत् दिवः
इति प्रातिपदिकस्य औत् स्यात् सौ सुद्यौः सुदिवौ सुदिवः दिव उत् पदान्ते सुद्युभ्याम् इत्यादि चत्वारः चतुरः चतुर्भिः
चतुर्भ्यः २ षट्चतुर्भ्यश्च। एभ्य आमो नुडागमः रषाभ्यां नो णः समानपदे चतुर्णाम् रोः सुपि रोरेव विस
र्गः सुपि चतुर्षु मो नो धातोः पदान्ते प्रशान् किमः कः विभक्तौ कः कौ के इत्यादि सर्ववत् इदमो मः सौ
त्यदाद्यत्वापवादः इदोऽय् पुंसि इदम इदोऽय् पुंसि सौ अयम् त्यदाद्यत्वे अतो गुणे अपदान्तादतो गुणे पर
पररूपम् एकादेशः दश्च इदमो दस्य मः स्यात् विभक्तौ इमौ इमे त्यदादेः सम्बोधनं नास्तीत्युत्सर्गः अनाप्यकः
अककारस्य इदम इदो अन् आपि विभक्तौ अनेन हलि लोपः अककारस्य इदम इदो लोपः आपि हलादौ नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे आद्यन्तवदेकस्मिन् एक
स्मिन् क्रियमाणं कार्यम् आदाविवान्त इव स्यात् सुपि चेति दीर्घः आभ्याम् नेदमदसोरकोः अककारयोरिदमद
सोर्भिस ऐस् न एभिः अस्मै एभ्यः २ अस्मात् अस्य अनयोः २ एषाम् अस्मिन् एषु द्वितीयाटौस्स्वेनः इदमे
तदोरन्वादेशे किंचित्कार्यं विधातुम् उपात्तस्य कार्यान्तरं विधातुं पुनरुपादानम् अन्वादेशः यथा अनेन व्याक
रणमधीतमेनं छन्दोऽध्यापय इति अनयोः पवित्रं कुलम् एनयोः प्रभूतं स्वमिति एनं एनौ एनान् एनेन ए ५

नयोः राजा इति संबुद्धौ नस्य लोपो न नो संबुद्धौ च हे राजन् नाव्ययपदे प्रतिषेधः ब्रह्मनिष्ठः राजानौ राजानः।
राजानं राजानौ राज्ञः राज्ञा राजभ्यां यज्वा यज्वानौ २ यज्वनः संयोगाद्धमान्तात् न वमान्तसंयोगाद्धनोकारस्य
लोपो न यज्वनः यज्वभ्यां ब्रह्मा ब्रह्माणः ब्रह्मणा इहन्नाघमाग्नेशा । एवमात्मविश्वपादयः सोऽच रत्नादि
नाम्नपर्यायादीर्घो संबुद्धौ सा वृत्रहा हे वृत्रहन् एकारान्तरपरेण: एकाच उत्तरपदे यस्य लसि समासे पूर्वपद
स्थानिमित्तात्परस्य प्रतिपदिकान्तनुम्विभक्तिस्थस्य णत्वम् वृत्रहणौ वृत्रहणः। हो हन्तेर्ञ्णिन्नेषु। जिति
णिति प्रत्यये नेच परे हन्तेर्हस्य घत्वं वृत्रघ्नः इत्यादि एवं शार्ङ्गिन् यशस्विन् अर्यमन् पूषन् मघवा बहुलं मघ-
वन् शब्दस्य वा तृ इत्यादेशः ऋदित्वात् नान्ते वेदः ऋत्वनमनेकाल्त्वात् नपीदकोऽसर्वनामस्थाने वा यानोः ग्रायानोर्
न लोपो नोपधायाश्च नस्य सर्वनामस्थाने संयोगान्तलोपस्यासिद्धत्वान्नलोपो न मघवान् मघवन्तौ म-
घवन्तं मघवन्तं मघवन्तौ मघवतः हे मघवन् तृत्वाभावे ह्रस्वदीर्घ राजवत् श्वयुवमघोनामतद्धिते अनन्तस्य
भसंज्ञानां यवानामतद्धिते संप्रसारणं स्यात् मघोनः मघवभ्यां एवं श्वन् युवन्। न संप्रसारणे संप्रसारणम्।
संप्रसारणे परतः संप्रसारणं न शुनः युवभ्याम् इत्यादि अर्वा हे अर्वन् अर्वाणस्त्रसावनञः नञा वर्जितस्य
अर्वन्त्यस्य तृ इत्ययमादेशो न तु सौ अर्वन्तौ अर्वन्तः अर्वद्भ्यामित्यादि अनञः किं अनर्वा पथिमथ्यृभुक्षामात्।
सौ इतोऽत्सर्वनामस्थाने थो न्थः पथिमथोस्थस्य न्थ इत्यादेशः सर्वनामस्थाने पन्थाः पन्थानौ भस्य टेः
लोपः भस्य पथ्यादेष्टिलोपः पथः पथा पथिभ्यां पथिभिः एवं मन्थाः ऋभुक्षाः सो नान्तात् इ ष्णान्ता षट्
संख्यायाः पञ्च पञ्च पञ्चभिः पञ्चभ्यः नुट् नोपधायाः नोपधाया नामि दीर्घो नामि पञ्चानां पञ्चसु अष्टन
आ विभक्तौ हलादौ वा स्यात् अष्टाभिः अष्टभिः ऋतानकारान्ताष्टनो नपुंसकस्यांशः अष्टाभ्यो निवर्त्य कृता।

तमिति देशेन तस्या सो विषये ग्राम्नेत्यापपतति गृहो २ गृहाभिः गृहाभ्यः २ गृहाणो गृहास्त ग्रामाभावे गृह पेचवत
मनितव्यं यस्तु लिगवत्रुतिक्रुं वाच यम्भः क्विप् ग्रेवलण्मपदेष्वनिक्रवोः केवलयोः क्वेचतयोपभागश्चति
पाश्वेन केनाविनो क्रुद्दितिरः शउपान्तविकारेति इ भिदः शवपः क्रुत्तोत्ताः वेरपृक्तस्यलोपः क्विन्नमय
स्यक्तः क्विप्रत्यये पश्चान्नस्य कवर्गोन्तादेशः परोते आत्विक आविनो आतिनः आत्विरपो पुनेत्समासे
पुनेत्सर्वेनामस्यानेनस्मसात् पुंसमासे तलोपः संयोगान्तस्यलोपः इत्येननस्यक्तः पुङ् पुंनो पुंनः पु
रुभ्यां वोक्ताः कवर्गस्य वर्गकः स्यात् कलिपरीते तपृक तपृक्तो तपृग्भ्यां त्वन त्वनो त्वन्मत् । वस्वं
भ्रत्वतुस्त्तनस्यजयजराजभ्राजच्छशांषः । यथोक्तचान्तयोश्च षः स्यात् कलिपरोतेव त्रषवृपप राट् रा
ड् राजो राड्भ्यां एवं विभ्राट् देवेट् विपवस्र्ट् पतोश्नेः षः परोते षरान्तुपपदश्वतेः क्विप् स्यात् परिषो
तो । विश्वाराट् विश्वराजो विश्वाराड्भ्यां । स्कोः संयोगाद्योरन्तेच । परोन्तेकलिचयः संयोगः तदद्यो
सकारककारयोः लोपः भृट् समस्त्रवेनषः जलोजशः कपिइ निपातस्यमः भृजो भृड्भ्यां त्यदाद्यन्तपर
न्तूपत्व । तदोसः सावनन्त्ययोः । त्यदादीनाञ्चं तानातदोरनन्त्ययोः सस्यात् सो स्यः स्या स्ये सः सो से यः
या ये यव यतो यतो ङेप्रथमयोरम् । युष्मदस्मद्योपरस्यङे-इरमेतस्य प्रथमादितीययोःश्चामादेशः ८
त्वाहौ सौ युवयोर्मपर्यन्तस्य त्वाहादेशः त्वसौ पौ पेलोपः यतपोश्चिलैवः त्वम् अहम् । युवावौ द्विवचने
द्वयोराकृतावनयोर्मपर्यन्तस्य युवावौ आदेशो स्तः प्रथमायांश्च द्विवचने भाषायां गौंग जयोत्यलोके युवाम् आवा
म । यूयवयो जसि । युवयोर्मपर्यन्तस्य यूयं वयं । त्वमावेकवचने । एकस्योक्त्योर्युवयोर्मपर्यन्तस्य त्वमौ
लः द्वितीयायांच युवयोः आत त्वाम् माम् शसोनः । अभ्योऽशसोनः स्यात् आमोपवादः आदेः परस

संयोगान्तस्य लोपः युष्मान् अस्मान्। टेयि। अनयोर्योर्देशेनादेशानादौ त्वया मया युष्मदस्मदोरत्वादेशे अनयोरा
त् स्यात् हलादौ युवाभ्यां आवाभ्यां युष्माभिः अस्माभिः तुभ्यमह्यौ ङयि। अनयोर्मपर्यन्तस्य इलोपः तुभ्यं म
ह्यं नयिपरे भ्यसेभ्यम् आभ्यां परस्य युष्मभ्यं अस्मभ्यं एकवचनस्य आभ्यां ङसेरात् त्वत् मत् पंचम्या अत् आभ्यां
परस्य पंचम्या भ्यसोत् युष्मत् अस्मत्। तवममौ ङसि। अनयोर्मपर्यन्तस्य युष्मदस्मदादेशानयोः स्यात् तवम
म युवयोः आवयोः साम आकम् आभ्यां परस्य साम आकं युष्माकम् अस्माकं त्वयि मयि युष्मासु अस्मासु यु
ष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ पदात्परयोरपादादौ स्थितयोः षष्ठ्यादिविशिष्टयोर्वा
नाविस्यादेशौ स्तः। बहुवचनस्य वस्नसौ उक्तविषययोरेवानयोः षष्ठ्यादिबहुवचनान्तयोः वस्नसौ स्तः तेमया
वेकवचनस्य उक्तविषययोरनयोः षष्ठीचतुर्थ्येकवचनान्तयोः स्तेमयनौ स्तः त्वामौ द्वितीयायाः द्वितीयैकव
चनान्तयो एतौ नामा स्तः श्रीशस्त्वावतु मापीह दत्तात्ते मेपि शर्म सः स्वामी ते मेपि स हरिः पातु मामपि नो विभु :
सुखं वा नो ददात्वीशः पतिर्वामपि नो हरिः सोव्याद्वो नः शिवं वो नो दद्यात्सेव्योत्र वः स नः एकवाक्ये युष्मद
स्मदादेशा वक्तव्याः एकतिङ्वाक्ये तेनेह न ओदनं पच तव भविष्यति एते वान्नावादय आदेशा अन्वादेशे
वा वक्तव्याः अन्वादेशे तु नित्यं स्युः धाता ते भक्तोस्ति धाता ते भक्तोस्तीति वा तस्मै ते नमः इत्येव सुपात् सुपादौ
सुपादः पादः पत् पाद्भवत्येषु परे शेषु पदभेत तद्धितस्य पाद हलाद्यघायाः ङिति हलोन्तानामतिदिष्टानां सर्वनाम
घायाघानलस्य पः किप् अग्निमत् अग्निमथौ अग्निमथः अग्निमङ्सौ अनिदितां हलउपधायाः ङिति हलोन्ताना
मनिदितामनिदितां सर्वनाम्नामुपधाया नस्य लोपः किति ङिति नमः संयोगान्तस्य लोपः नस्य क्वचन नः शाङ्।
प्रावौ प्रांचः। प्रचः। लुप्तनकारस्यंचतेभस्याकारस्य लोपः वौ लुप्ताकारनकारांचतेरापरे पूर्वस्यानो दी।

ल॰ कौ॰ ११

चेः प्राचः प्राग्भ्यां प्रत्यङ् प्रत्यञ्चौ प्रतीचः प्रत्यग्भ्यां उदङ् उदञ्चौ उदईत् उच्छब्दात्परस्य लुप्तनकारस्याञ्चतेर्भस्याकारस्य ईत्।
उदीचः उदग्भ्यां समः स्मि वप्रत्ययान्तेऽञ्चतौ सम्यङ् सम्यञ्चौ समीचः सम्यग्भ्यां सहस्य सध्रिः तथा सध्र्यङ् तिरसस्ति
र्यलोपे अलन्त्याकारे चाञ्चतौ वप्रत्ययान्ते तिरसस्तिर्यादेशः तिर्यङ् तिर्यञ्चौ तिरश्चः तिर्यग्भ्यां नाञ्चेः पूजायां पूजा॰
र्थस्याञ्चतेरुपधाया नलोपो न प्राङ् प्राञ्चौ नलोपाभावात् लोपो न प्राञ्चः प्राङ्भ्यां प्राङ्क्षु एवं पूजार्थे प्रत्यङ्डा॰
दयः क्रुङ् क्रुञ्चौ क्रुञ्चः क्रुङ्भ्यां पयोमुक् पयोमुचौ पयोमुचः पयोमुग्भ्यां उगिदचामिति नुम् ।सान्तमहतः संयोगस्य।
सान्तसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घोऽसंबुद्धौ सर्वनामस्थाने महान् महान्तौ महान्तः हे महन् म
हतः महता महद्भ्यां अत्वसन्तस्य चाधातोः। अत्वन्तस्योपधाया दीर्घो धातुभिन्नासन्तस्य चासंबुद्धौ सौ धीमान्धी
मन्तौ हे धीमन् शसादौ महद्वत् । भातेर्डवतु । डित्सामर्थ्यात् टेर्भस्यापदे लोपः भवान् भवन्तौ शत्रन्तस्य त्वभ॰
वन् । उभे अभ्यस्तं । षाष्ठद्वित्वप्रकरणे ये द्विर्विहिते ते उभे समुदिते अभ्यस्तसंज्ञे स्तः । नाभ्यस्ताच्छतुः अभ्यस्ता
च्छतुर्नुम् न ददत् ददत् जक्षित्यादयः षट् षड् धातवोऽन्ये जक्षितिश्च सप्तमस्ते अभ्यस्तसंज्ञाः स्युः जक्षत् जक्षतौ
एवं जाग्रत् दरिद्रत् शासत् चकासत् दीध्यत् वेव्यत् गुप् गुपौ गुपः त्यदादिषु दृशोऽनालोचने कञ्च।
त्यदादिषूपपदेषु अज्ञानार्थाद् दृशेः कञ् चात् क्विन् प्रायश्चेन्नान्यः दृग्दृशवतुषु तादृक् तादृग् तादृशौ तादृग्भ्यां व्रश्च
इति षः जश्त्वचर्त्वे विट् विड् विशौ विड्भ्यां नशेर्वा नशेः कवर्गोऽन्तादेशो वा पदान्ते नक् नग् नट् नड् न
शौ नशः नग्भ्यां नड्भ्यां स्पृशोऽनुदके क्विन् अनुदके सुप्युपपदे स्पृशेः क्विन् घृतस्पृक् घृतस्पृशौ घृतस्पृग्भ्यां रत्न
मुट् रत्नमुषौ रत्नमुड्भ्यां षट् षड्भिः षड्भ्यः षण्णां षट्सु रुत्वं प्रति षत्वस्यासिद्धत्वात् ससजुषो रुरिति रुत्वे वोरु
पधाया दीर्घ इकः रेफवान्तस्य धातोरुपधाया इको दीर्घः पदान्ते पिपठीः पिपठिषौ पिपठीर्भ्यां ।नुम्विसर्ज ११

नीचशब्दवाचेपि पतेः प्रत्यकेव्ययपाने पिद्धाम्भ्यां परस्य समस्य पूर्वस्य सः ह्लवेन पूर्वस्य सः पिपठीषु विकीः विकीर्षु ॥
विद्वान् विद्वांसौ हे विद्वन् । वसोः सम्प्रसारणम् । वसन्तस्य भस्य सम्प्रसारणं स्यात् विदुषः वसुस्रंसुध्वंस्वनडुहां दः ।
विद्वद्भ्याम् पुंसोऽसुङ् सर्वनामस्थाने पुमान् पुमन् पुमांसौ पुंसः पुंभ्याम् पुंसु ऋदुशनेत्यङ् उशना उशनासौ अ
स्य सम्बुद्धौ वा नङ् नलोपश्च वा वाच्यः हे उशनन् हे उशन हे उशनः उशनोभ्याम् सः अनेहा अनेहसौ अनेहसः वेधाः
वेधसौ हे वेधः वेधोभ्याम् । अदस औ सुलोपश्च अदसौ सौ स्यात् सुलोपश्च तदोरिति सः असौ त्यदाद्यत्वं पररू
पत्वं वृद्धिः अदसोऽसेर्दादु दो मः अदसोऽसान्तस्य दात्परस्य उदूतौ दस्य मश्च आन्तरतम्याद्ध्रस्वस्य उः दीर्घस्य ऊः
अमू जसः शी गुणः एत ईद्बहुवचने अदसो दात्परस्य एत ईत् दस्य मो बहूक्तौ अमी पूर्वत्रासिद्धमिति
विभक्तिकार्यं प्राक् पश्चादुत्वमत्वे अमुम् अमू अमून् उत्वमत्वे कृतेपि घिसंज्ञायाम् अमवः न मु ने नाभावे
कर्तव्ये कृते च मुभावो नासिद्धः अमुना अमूभ्याम् अमीभिः अमुष्मै अमीभ्यः अमुष्मात् अमुष्य अमुयोः अमी
षाम् अमुष्मिन् अमीषु । इति हलन्ताः पुंलिङ्गाः ॥ नहो धः कलिपदानेच । नहिवृतिवृषिव्यधिरुचिसहि
तनिषु क्वौ । क्विबन्तेषु पूर्वस्य दीर्घः उपानत् उपानहौ उपानहः उपानद्भ्याम् उपानत्सु क्विन्प्रत्ययस्य कु
स्वेन वः उष्णिक् उष्णिहौ उष्णिग्भ्याम् द्यौः दिवौ दिवः द्युभ्याम् गीः गिरौ गिरः गीर्भिः एवं पूः चतस्रः २ चत
सृणाम् काकेकाः सर्वावत् यः सा इदमो मः इयम् सौ त्यदाद्यत्वे टाप् दश्चेति मः इमे इमाः इमाम्
अनया हलि लोपः आभ्याम् आभिः अस्यै अस्याः २ अनयोः आसाम् स्रक् स्रजौ स्रग्भ्याम् त्यदाद्यत्वे टाप्
स्यातेः त्याः एवं तद् यद् एतद् वाक् वाचौ वाग्भ्याम् अप्शब्दो नित्यं बहुवचनान्तः अप्तृन्निति दीर्घः आपः अपः
अपोभिः अपः स्वकारादौ प्रत्यये अद्भिः २ अपां अप्सु दिक् दिशौ दिग्भ्याम् त्यदादिष्विति दृशेः क्वि

ल० कौ० १२ त्विषान्तदस्यज्ञापितत्वे दृक् दृशौ दृग्भ्यां त्विट् त्विषौ त्विड्भ्यां ३ असौ उत्वमत्वे अमू अमूः अमुया अमूभ्यां ३
अमूभिः अमुष्यै अमूभ्यः २ अमुष्याः २ अमुयोः २ अमूषां अमुष्यां अमूषु इति हलन्ताः स्त्रीलिङ्गाः॥ स्वमोर्लुक्।
दत्वं स्वनडुत् स्वनडुही स्वनड्वांहि चतुरनडुहोरामुदात्तः स्वनड्वांहि पुनस्तद्वत् शेषं पुंवत्। दत्वम्॥ वाः वारी वारि
वारा वार्भ्यां ३ चत्वारि २ किं के कानि इदं इमे इमानि अन्वादेशे नपुंसके एनद्वक्तव्यः एनत् एने एना-
नि एनेन एनयोः २ न ङिसम्बुद्ध्योः नपुंसकानां नलोपः वा वाच्यः हे ब्रह्मन् हे ब्रह्म ब्रह्मणी ब्रह्माणि अहः।
विभाषा ङिश्योः अह्नी अहनी अहानि २ हे अहः अहन् अहन्निति रूपरात्रिरथन्तरेषु अहोभ्यां ३ दण्डि दण्डिनी दण्डीनि
सुपथि टेर्लोपः सुपथी सुपन्थानि ऊर्क् ऊर्जी ऊर्न्जि २ नरजानां संयोगः त्यद् त्ये त्यानि तत् ते तानि यत् ये यानि
एतत् एते एतानि गोक् गोची गवाञ्चि पुनस्तद्वत् गोचा गोग्भ्यां ३ शकृत् शकृती शकृन्ति ददत् द-
दती वा नपुंसकस्य अभ्यस्तात् क्लीबस्य शतुर्नुम् वा स्यात् सर्वनामस्थाने ददन्ति ददति तुदत् आच्छी-
नद्योर्नुम् अवर्णान्तादङ्गात्परस्य शतुर्नुम् वा शीनद्योः शप्श्यनोर्नित्यं तदन्तस्य नुम् शीनद्योः पचन्ती पचन्ति दीव्यत् दी-
व्यन्ती दीव्यन्ति धनुः धनुषी सान्तेति दीर्घः धनूंषि। नुम्विसर्जनीयशर्व्यवायेऽपि इति षः धनुषा धनुर्भ्यां ए-
वं चक्षुर्हविरादयः पयः पयसी पयांसि २ पयसा पयोभ्यां २ पयोभिः सुपुम् सुपुंसी सुपुमांसि अदः वि-
भक्तिकार्यम् उत्वमत्वे अमू अमूनि शेषं पुंवत् इति हलन्ता नपुंसकलिङ्गाः॥ स्वरादिनिपातमव्ययम्। स्वर् अ-
न्तर् प्रातर् पुनर् सनुतर् उच्चैस् नीचैस् शनैस् ऋधक् ऋते युगपत् आरात् पृथक् ह्यस् श्वस् दिवा रात्रौ सायं
चिरं मनाक् ईषत् जोषं तूष्णीं बहिस् अवस् समया निकषा स्वयं वृथा नक्तं नञ् हेतौ इद्धा अद्धा सा-
मि वत् ब्राह्मणवत् क्षत्रियवत् सनात् उपधा सनात् तिरस् अन्तरा ज्योक् कम् शम् सहसा विना नाना स्वस्ति १२

स्वधा अलं वषट् श्रौषट् वौषट् अन्यत् अस्ति उपांशु क्षमा विहायसा दोषा मृषा मिथ्या मुधा पुरा मिथो मिथस्
प्रायस् मुहुस् पयस् प्रवाहिके आर्ये अलं अभीक्ष्णं साकं सार्धं नमस् हिरुक् धिक् अथ अथो अम् आम् प्रप
त कुवित् चित् चण् यत्र कच्चित् नाह नत माकिं माकीं नाकिं नाकीं माङ् नञ् यावत् तावत् त्वै रै श्रौषट्
वौषट् स्वाहा स्वधा वषट् तुम तथाहि खलु किल सुष्ठु स्म अथ आदह उपसर्गविभक्तिस्वरप्रतिरूपकाश्च अ
वदत्तं अहंयुः अस्तिक्षीरा अ आ इ ई उ ऊ ए ऐ ओ औ पशु शुकं यथा कथाच पाट् प्याट् अङ्ग है हेः भो अये एकप
दे युत् आतः चादिरप्याकृतिगणः तसिवती नानाञौ एतदन्तमप्यव्ययमित्यादि कृन्मेजन्तः कृद्यो मान्त ए
जन्तश्च तदन्तमव्ययं स्मारं स्मारं जीवसे पिबध्यै क्त्वातोसुन्कसुनः एतदन्तमव्ययं कृत्वा उदेतोः वि
सृपः अव्ययीभावश्च अधिहरि अव्ययादाप्सुपः अव्ययाद्विहितस्यापः सुपश्च लुक् स्यात् तत्र शालायां ॰
अथ सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु वचनेषु च सर्वेषु यन्न व्येति तदव्ययं वष्टि भागुरिरल्लोपमवाप्यो
रुपसर्गयोः आपं चैव हलन्तानां यथा वाचा निशा दिशा २ वगाहः अवगाहः पिधानम् अपिधानम् ॥
इत्यव्ययानि ॥ नमो नमः ॥ अथ तिङन्तम् ॥ लट् लिट् लुट् लृट् लेट् लोट् लङ् लिङ् लु
ङ् लृङ् एषां पञ्चमो लकारश्छन्दोमात्रगोचरः लः कर्मणि च भावे चाकर्मकेभ्यः लकाराः सकर्मकेभ्यः कर्म
णि कर्तरि च स्युः अकर्मकेभ्यो भावे कर्तरि च वर्तमाने लट् अटौ इतौ उच्चारणसामर्थ्याल्लस्य नेत्वं लस्य अ
धिकारोऽयं भूसत्तायां कर्तृविवक्षायां भू लः इति स्थिते तिप् तस् झि सिप् थस् थ मिप् वस् मस् त आतां झ
थास् आथां ध्वम् इट् वहि महिङ् इत्यष्टादश लादेशाः स्युः लः परस्मैपदं लादेशाः परस्मैपदसंज्ञाः स्युः त
ङानावात्मनेपदं तङ् प्रत्याहारः शानच् कानचौ चात्मनेपदसंज्ञौ स्तः पूर्वसंज्ञापवादः अनुदात्तङित आ

ल॰ कौ॰ १२ त्मनेपदे अनुदात्तेत उपदेशे योरित् तदन्ताद्धातोर्लस्थाने आत्मनेपदं स्यात् स्वरितञितः कर्त्रभिप्राये क्रियाफ
ले स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात् कर्त्रगामिनि क्रियाफले शेषात्कर्तरि परस्मैपदं आत्मनेपदनिमि
त्तहीनाद्धातोः कर्तरि परस्मैपदं स्यात् तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः तिङ उभयोः पदयोस्त्रि
13 काः क्रमादेतत्संज्ञाः स्युः तान्येकवचनद्विवचनबहुवचनान्येकशः लब्धप्रथमादिसंज्ञानि तिङः त्रीणि त्रीणि प्रत्ये
कमेकवचनादिसंज्ञानि स्युः युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः तिङ्वाच्यकारकवाचिनि युष्मद्यु
पपदे प्रयुज्यमानेऽप्रयुज्यमानेपि मध्यमपुरुषः स्यात् शेषे प्रथमः भू ति इति जाते तिङ्शित्सार्वधातुकं तिङः
शितश्च सार्वधातुकसंज्ञा कर्तरि शप् कर्त्रर्थे सार्वधातुके धातोः शप् सार्वधातुकार्धधातुकयोः अनयोः पर
योरिगन्ताङ्गस्य गुणः अवादेशः भवति भवतः झोन्तः प्रत्ययावयवस्य झस्यान्तादेशः स्यात् अतो गुणे भवति
भवसि भवथः भवथ अतो दीर्घो यञि अतोङ्गस्य दीर्घो यञादौ सार्वधातुके परे भवामि भवावः भवामः
स भवति तौ भवतः ते भवन्ति त्वं भवसि युवां भवथः [illegible] यूयं भवथ अहं भवामि आवां भवावः व
यं भवामः शेषविभाषाकखादावषान्त उपदेश उप [illegible] देशेऽकादिखादिषान्तवर्जे गदनदादेरन्य
स्मिन्धातौ परे उपसर्गस्थान्निमित्तात्परस्य नेर्णत्वं वा स्यात् प्रणिभवति प्रनिभवति परोक्षे लिट् भूतानद्यत
नपरोक्षार्थवृत्तेर्धातोर्लिट् स्यात् लस्य तिबादयः लिट् च लिडादेशस्तिङ् आर्धधातुकसंज्ञः स्यात् तेन शबा
दयो न परस्मैपदानां णलतुसुस्थलथुसणल्वमाः लिटस्तिबादीनां णलादयः स्युः भू अ इति स्थिते भुवो वुग्लुङ्लि
टोः अचि लिटि धातोरनभ्यासस्य लिटि परेऽनभ्यासस्य धात्ववयवस्यैकाचः प्रथमस्य द्वे स्तः आदिभूता
दचः परस्य तु द्वितीयस्य भूव् भूव् इति स्थिते पूर्वोभ्यासः अत्र ये द्वे विहिते तयोः पूर्वोभ्याससंज्ञः स्यात् हल १२

लादिशेषः अभ्यासस्यादिर्हल् शिष्यते शेषे हलो लुप्यन्ते ह्रस्वः अभ्यासस्याचो ह्रस्वः स्यात् भवतेरः भवतेरभ्यासो
कारस्य अतः स्यात् लिटि अभ्यासे चर्च अभ्यासे झलां चरः स्युर्जशश्च झशां जशः खयां चर इति विवेकः बभूव
बभूवतुः बभूवुः आर्धधातुकस्येड्वलादेः वलादेरार्धधातुकस्येट् स्यात् बभूविथ बभूवथुः बभूव बभूविव ब
भूविम अनद्यतने लुट् भविष्यत्यनद्यतनेर्थे धातोर्लुट् स्यात् स्यतासी लृलुटोः धातोरेतौ स्तः लृलुटोः परतः (
शबाद्यपवादः लृ इति लृङ्लृटोर्ग्रहणं आर्धधातुकं शेषः तिङ्शिद्भ्योन्यो धातोरिति विहितः प्रत्ययस्तत्संज्ञः इ
ट् लुटः प्रथमस्य डारौरसः डित्त्वसामर्थ्यादभस्यापि टेर्लोपः भवितारः तासस्त्योर्लोपः सादौ प्रत्यये परे रि च राधोश्च
प्रत्ययेन लक्ष्या भवितारौ भवितारः भवितासि भवितास्थः भवितास्थ भवितास्मि भवितास्वः भवितास्मः लृ(
ट् शेषे च भविष्यदर्थाद्धातोर्लृट् स्यात् क्रियार्थायां क्रियायां सत्यामसत्यां च भविष्यति भविष्यतः भविष्यन्ति
भविष्यसि भविष्यथः भविष्यथ भविष्यामि भविष्यावः भविष्यामः लोट् च विध्याद्य(
र्थेषु धातोः लोट् आशिषि लिङ्लोटौ एरुः लोट इकारस्य उः भवतु तुह्योस्तातङ्ङाशिष्यन्यतरस्याम् आशिषि तु
ह्योस्तातङ् वा परत्वात्सर्वादेशः भवतात् लिटो लवत्वात् लोटो लङ्वत् लोटस्तामादयः सलोपश्च तस्थस्थमिपां ताते
